DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

READINGS IN SANSKRIT
PART 1

# WEEK THREE

Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Fall Term, Class Schedule

**WEEK THREE: Thursday, Oct. 18, 2007 1:00 – 4:00 PM**

A. Quiz
B. Review of homework
C. Introduction to Arya Nagarjuna's मूलमध्यमककारिका, chapter 21

**HOMEWORK:**

1. Provide a word by word English translation of Chapter 21 of Arya Nagarjuna's मूलमध्यमककारिका (see below).
2. Provide a word by word English translation of the verses from the भगवद् गीता below.

# मूलमध्यमककारिका

## संभवविभवपरीक्षा नामैकविंशतितमं प्रकरणं

विना वा सह वा नास्ति विभवः संभवेन वै।
विना वा सह वा नास्ति संभवो विभवेन वै॥ १

भविष्यति कथं विभवः संभवं विना।
विनैव जन्म मरणं विभवो नोद्भवं विना॥ २

संभवेनैव विभवः कथं सह भविष्यति।
न जन्ममरणं चैवं तुल्यकालं हि विद्यते॥ ३

भविष्यति कथं नाम संभवो विभवं विना।
अनित्यता हि भावेषु न कदाचिन्न विद्यते॥ ४

संभवो विभवेनैव कथं सह भविष्यति।
न जन्ममरणं चैव तुल्यकालं हि विद्यते॥ ५

सहान्योन्येन वा सिद्धिर्विनान्योन्येन वा ययोः।
न विद्यते तयोः सिद्धिः कथं नु खलु विद्यते॥ ६

क्षयस्य संभवो नास्ति नाक्षयस्यास्ति संभवः।
क्षयस्य विभवो नास्ति विभवो नाक्षयस्य च॥ ७

संभवो विभवश्चैव विना भावं न विद्यते।
संभवं विभवं चैव विना भावो न विद्यते॥ ८

संभवो विभवश्चैव न शून्यस्योपपद्यते।
संभवो विभवश्चैव नाशून्यस्योपपद्यते॥ ९

संभवो विभवश्चैव नैक इत्युपपद्यते।
संभवो विभवश्चैव न नानेत्युपपद्यते॥ १०

दृश्यते संभवश्चैव विभवश्चैव ते भवेत्।
दृश्यते संभवश्चैव मोहाद्विभव एव च॥ ११

न भावाज्जायते भावो भावो ऽभावान्न जायते।
नाभावाज्जायते ऽभावो ऽभावो भावान्न जायते॥ १२

न स्वतो जायते भावः परतो नैव जायते।
न स्वतः परतश्चैव जायते जायते कुतः॥ १३

भावमभ्युपपन्नस्य शाश्वतोच्छेददर्शनं।
प्रसज्यते स भावो हि नित्यो ऽनित्यो ऽथ वा भवेत्॥ १४

भावमभ्युपपन्नस्य नैवोच्छेदो न शाश्वतं।
उदयव्ययसंतानः फलहेत्वोर्भवः स हि॥ १५

उदयव्ययसंतानः फलहेत्वोर्भवः स चेत्।
व्ययस्यापुनरुत्पत्तेर्हेतूच्छेदः प्रसज्यते॥ १६

सद्भावस्य स्वभावेन नासद्भावश्च युज्यते।
निर्वाणकाले चोच्छेदः प्रशमाद्भवसंततेः॥ १७

चरमे न निरुद्धे च प्रथमो युज्यते भवः।

चरमे नानिरुद्धे च प्रथमो युज्यते भवः॥ १८

निरुध्यमाने चरमे प्रथमो यदि जायते।

निरुध्यमान एकः स्याज्जायमानो ऽपरो भवेत्॥ १९

न चेन्निरुध्यमानश्च जायमानश्च युज्यते।

सार्धं च म्रियते येषु तेषु स्कन्धेषु जायते॥ २०

एवं त्रिष्वपि कालेषु न युक्ता भवसंततिः

त्रिषु कालेषु या नास्ति कथं भवसंततिः॥ २१

*****

## भगवद् गीता

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।

समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥ १८ - ५०

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।

शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥ १८ - ५१

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।

ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ १८ - ५२

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्।

विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥ १८ - ५३

ब्रह्मभुतः प्रसन्नात्मा न शोचति न काङ्क्षति।

समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥ १८ - ५४